M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 152

Title: Sa. Sangraha

Sāra Saṅgraha	Title
Varadarāja Kavi	Author
	Editor
first Paricchedā	Year, Vols.
	Publisher
132	Remarks

सत्क्रियामनिबंधकृन्नं दुरितं प्रमूः कारकाः

सारी

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ नमामि परमात्मानं स्वतः सर्वार्थवेदिनं । विद्याना त०टी०
मादिकर्त्तारं निर्मितं नगतामपि ॥१॥ नागजाननाय महसे प्रत्यूहतिमिरच्छिदे ॥ अप्रा
रकरुणापूरतरंगितदृशे नमः ॥२॥ प्रारिप्सितस्य ग्रंथस्य प्रेक्षावदुपादेयत्वाय प्रयोजिकाभिमत
फलता स्वफलसाधनतामभिधेयप्रयोजने तु दृष्टमनुबध्नन् प्रमाणेभ्यो बोधयन्नेव दर्शयति निःश्रेय
सफलं प्रमाणादीनां तत्त्वावधारणं प्रमाणादिपदार्थोक्तेस्तत्त्वं नेत्यादि नातिविस्तरं । तेषां प्रमाणादीनां निःश्रेय
सत्वानां तानि षोडशपदार्थानां तत्त्वावधारणं आत्यंतिकदुःखविच्छेदलक्षणनिःश्रेयसफलं तद् तुल्येनानु
चरणाद्यैर्लघुनिश्चमत्र यावल्लभ्यं ति । यथा प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवत राम:
र्कनिर्णयवादजल्पवितंडाहेत्वाभासछलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति । तर १
ते तिलव्दतानीपदार्थाः जल्पन्ते ॥७॥१

समानानामभावाच्चिनोऽज्ञातीयच्च वक्ष्येदेक एवमेव तया प्रदर्श्यते इत्यर्थः । ननु चिरंतन निबंधना
नितत्र स्वविषये तेनान्येरनिष्ठत्वो व्याक्रियतो किमनेन ग्रन्थेन निर्माणक्लेशेन त्यत उक्तं
नातिविस्तरमिति । अतिविततगहनगंभीरैस्तैरल्पमेधायाविशेष्यानवकलाप्रदर्शितदेशकां
त इत्यर्थवानेवायमारंभः । ननु प्रमाणादयो वात्र प्रपंचो निबिध्यते नार्थ्यतेति विस्तर शब्दे
प्रत्युक्ताभस्य तावः प्रमाणाधीनं सिद्धिर्वादिनां पदार्थानां प्रथमं चैत प्रथमत्वं उद्दिष्टं प्र
माणं तावल्लक्षयति । तत्र प्रमाणं प्रमया व्याप्तं प्रमितिसाधनं प्रमाश्रये वा तव्याप्ती य
था वा तन्व कः प्रमाश्रयः साधनाश्रययोरन्यतरत्वे सति प्रमाव्याप्तं प्रमाणं । ततश्चेश्वरव्यापि
प्रमाश्रयतया प्रमाणं सिद्धं न व्याप्तिः । न च प्रमाश्रयेश्वरे नीरूपात्मन्निति प्रमाणकरणे

सा०

यां इष्टिकसंज्ञादिलिंगविरहप्रमादिति रतिव्याप्तिः। तेषां प्रमाणसंबंधे नियमाभावात्। न तर्हीन्द्रि
यलिंगशब्दाः प्रमाणं न स्युः। तत्रापि तन्नियमाभावादिति चेत्। मा भूवन्। न हि वयं तेषां
प्रामाण्यमभ्युपगच्छामः। इंद्रियार्थसंनिकर्षविशेषस्य लिंगपरामर्शादेश्च प्रामाण्याभ्युपग
मात्। न चैते प्रमां व्यभिचरंतीति नाव्याप्तिदोषः। एवं च प्रमाणसंबंधिप्रमेयस्यातद्व्यभिचारा
त्प्रामाण्यप्रसंगः। किमर्थं तर्हि साधनमाश्रयो वेति विशेषणं व्यालपादापादानादेव प्रमे
यादिव्यावृत्तेरिति चेत्। सत्यं। तयोरेव प्रमाव्याप्तिः स्यादेवतीति एतावता तदुपादानं। न तु
तद्दोषेण शरीरानुप्रवेशेन। सुखादिप्रमेयव्यवच्छेदेन तदनुप्रवेशो वाक्यार्थ इति नावैय
र्थ्यं। यथार्थानुभव इति प्रमालक्षणं। तत्र यथार्थेत्ययथार्थौ विषयाः पीतशंखा २

दिविप्रमाः व्युदस्यंते। अतएव तर्कसंशययोरपि व्यवच्छेदसिद्धिः। तर्कस्याहार्यलिंगजन्यत्वेना
रोपितविषयत्वस्यार्थेन समर्थयिष्यमाणत्वात्। विरुद्धानियतकोटिद्वयावलंबिनस्तादृश
विषयासंभवेनायथार्थत्वात्संशयस्य। अनुभवेऽतिस्मृतेर्निरासः। किमिदमनुभवत्वं नाम
प्रत्यक्षत्वासाधारणंकारणप्रकृतप्रत्ययत्वं अनुभवत्वं। तदविदुषां कालोत्पत्तिनियमेती
साधारणकारणप्रकृतप्रत्ययत्वं स्मृतेरसाधारणं कारणं संस्कारः। तस्यातदुत्पादनेनोता
कालिकत्वनियमाभावात् तत्रप्रसक्तिः। ज्ञानत्वावांतरजातिर्नैवाअनुभवत्वं स्मृति
व्यतिरिक्तज्ञानत्वं वा। साधनमाश्रयो वेत्युक्तेन वार्थविषयविशेषव्यवच्छेदया प्रपंच
यति। नित्यानित्यतया द्वेधा प्रमा नित्या प्रमाश्रयः। प्रमाणमितरस्यास्तुकरणस्य प्रमा

ण।ताएवं च नित्यप्रमाश्रयत्वादीश्वरस्यापि प्रमितं तत्र सिद्धं तत्सिद्धं प्रामाण्यमपि लब्धं।तं तत्वति
तदुक्तं।आप्तप्रामाण्यादिति।तन्मे प्रमाणं शिव इति च।अत्र प्रमासाधकतमं प्रमाणमित्यादौ नि
त्यायविदां लक्षणवचनानि लौकिकप्रमाणमात्रपराणि।अत एव प्रमातुरेवेश्वरस्य प्रमावि
नाभावेन प्रामाण्यमनुपपादयंत आहुः।मितिः सम्यक्परिच्छित्तिस्तद्वत्ता प्रमातृता।तदयो
गव्यवच्छेदः प्रामाण्यं गौतमे मत इति।अथ स्फुटतरानन्यदोषतया।तेषां स्वरूपव्याक्रि
येयं च निराक्रियेति मन्वानः प्रावादुकानां प्रमाणलक्षणान्यनुपन्यस्यति।अविसंवादि वि
ज्ञानं प्रमाणमिति सौगताः।अनुभूतिः प्रमाणं सा स्मृतेरन्यतिकेचन।अज्ञाततत्त्वं त २
त्वार्थनिश्चायकमथापरे।प्रमेयव्याप्यमपरः प्रमाणमिति मन्यते।६ प्रमानियतस्या

मत्त्वं प्रमाणं केचिदूचिरे।तथागतमतानुवर्त्तिनो ह्यविसंवादिविज्ञानं प्रमाणं अविसंवादश्चार्थक्रि
याप्तिरिति लक्षयंति।यथाहुः।प्रमाणमविसंवादिज्ञानमर्थक्रियास्थितिः अविसंवादन
मिति।तदसत्।एतेन विप्रलिप्सुविषये अनुमाने अव्याप्तेः।न ह्यसतो भूतस्य भविष्यतो वा काचिदर्थ
क्रियानामास्ति स्मृतिज्ञानस्य विकल्पकज्ञानात्यां चातिव्याप्तेः।न हि तत्र प्रवृत्तौ विसंवादः
तो विकल्पस्याप्यविसंवादेनानंगीकारे निर्विकल्पकस्यापि न स्यात्।तद्वारत्वात्तदविसं
वादनस्यान्यस्वलक्षणे निदर्शनेन तस्याविसंवादित्वं साधयितुं शक्यते।प्रत्यक्षादिप्रा
प्तिरिव विकल्पे।सकललैंगिकविकल्पे प्रामाण्यं स्यात्।तन्मिथ्यात्वे वा आश्रयासिद्धिः।

प्रपद्यते। अनुमानप्रामाण्यमप्युक्तमर्थं कथमाय घेत। एतेनार्थजत्वमर्थविषयत्वं वाविसंवादं इ
ति निरस्तं। विकल्पस्यापि तथाभावेन प्रामाण्यप्रसंगात्। अथैवं मन्यसे। स्वलक्षणप्रभवं निर्विकल्प
कं तन्मात्रदारोपितार्थप्रतीतावसकृत् विकल्पः स्वलक्षणे पुरुषं प्रवर्त्तयति। संवादयति चामणि
प्रभाविषयमणिविकल्पन्यायेन परंपरयार्थसंबंधित्वात्। न त्वाहत्यार्थजत्वं अर्थविष
यत्वं वास्यास्तीत्यप्रामाण्यमिति। नहि तत एव प्रामाण्यमनुमानस्यापि स्यात्। अथ दहनस्व
लक्षणधूमस्वलक्षणं तस्मात्तदुत्पन्नः तद्धूमविकल्पः ततो दहन इति विकल्पपारं
पर्येणार्थजत्वेनानुमानप्रामाण्यमभ्युपगम्यते। तर्हि तत एव विकल्पस्यापि प्रामाण्य
मभ्युपगम्यतां तत्रापि पारंपर्यस्यानुवर्त्तनात्। पातनबाधविरहादविसंवादइति चेत्प्र ४

यैकेन वा वस्तुगतसामान्यविषयत्वादप्रामाण्यं विकल्पस्य। अनुमानस्यापि तथाभावप्रसं
गात्। तत एतन्निरस्तं। तथा च विकल्पो ऽवस्तुनिर्भासादसंवादादुपप्लव इति। तथा। तस्यां
यद्रूपमाभाति बाह्यमेकमिवान्यतः। व्यावृत्तमिव निस्तत्त्वं परीक्षानंगभावत इति। अनुमानयोगक्षेमत्वा
द्विकल्पस्य। न चाशब्दार्थमेकस्यार्थस्य शब्दात्मना वजात्मानि मिथ्यात्वं विकल्पस्य। न हि घटोयमित्यस्या
र्थे घटशब्दोयमिति किं तु घटशब्दवाच्योयमिति। यदाहुः संज्ञादिसमर्थमाणोपि प्रत्यक्षत्वं न बाध
ते संज्ञिनः स्वात्मा न ह्यादिनरूपाच्छादनक्षमेति॥ ॥प्रभाकरास्तु॥ अनुभूतिं प्रमाणं। स्मृतिव्यति
रिक्ता च संविदनुभूतिः। स्मृतिस्तु संस्कारमात्रजं ज्ञानमिति। तस्यैव लिङ्ग। तथाहुः प्रमाणमनुभूतिः

सांप्रतं स्मृति। स्वनः। पूर्वविज्ञानसंस्कारमात्रजं ज्ञानमनुच्यत इति। तत्र तावत्प्रमाणलक्षे
तो प्रथमाधस्तयोर्वदाप्रामाण्यवादिनो बौद्धास्तेन्मृतिविरत्वाकथं ज्ञानित्यस्य ज्ञानस्य स्वतः प्रामा
ण्यं प्रसाध्येतदानीं स्मृतिश्च व वक्ष्यदेनानुभूतिश्च लक्षणं प्रामाण्यं प्रसाध्यत इति मदर्दिरव्या
ख्यानेकोशलमासु प्रमातां। किंच स्मृति ज्ञानानामात्मस्वात्मनोरतिमतं प्रामाण्यं न विधीयेत। स्मृति
नां स्मृतिव्यतिरिक्तैर्वाक्येनानुभूतिविरात्रा हेतयप्रकाशरूपायास्तथा वै घांशएव संस्का
रजत्वेन स्मृतित्वं न त्वंशांतरयोरप्रीतिश्चेतनेनालोर्हेतयोः संस्कारजन्यत्वा भावकारणं तरं वाच्यं।
न हिन्नवर्यं विद्यांविषयमकाशांशकारणात्वेति। एकएकारणांतरं दृष्टमिदं वा। यथोक्तं। प्रा ५

हर

त्र द्दं१

ताकस्तं प्रमागरयामेरंष्यनाशालिकानाथमैति। सर्वं विज्ञानहेतुत्वमितो मातरस्विप्रमा। माको
मा२ नकारिभ्वि सार्थदाम्मरणरूपासं विज्ञौन्योत्मत्यत्वेन संमतति। एतेन स्वोत्पत्तौ संविदंतरान
पेक्षत्वमनुभूतित्वं मिथ्यापास्ता। द्रावोक्तेस्मकल होमानतिरत्ने। अपि चास्वविकल्पकप्रत्यक्षो
त्थानुमानादीनां स्वसंविदंतरापेक्षोत्पत्तित्वेनानुभूतित्वात्प्रामाण्यं न स्यात्। स्वस्मानभिवि वि४
षयसंविदंतरानपेक्षत्वमनुभूतित्वमनिमतमिति। स्वितोनत द्वियात्पिग्राहकप्रमाणानधि
कविषयमनुमानमित्यन्यथयगमान्न्यस्य स्वसमानविषयविमर्शापेक्षत्वांगीकाराच्चैतयो घेर
रनुभूतित्वं न स्यात्। स्याद्वाविमर्शापिन्नात्मीय एवचाणो नवं तं प्रदराति। अर्थाथपरिच्छेद

स्तुनता कंस्मरणंविमर्शः२

२

नेत्तोस्वकार्ये स्वसमानविषयत्वं विदं तरानपेक्षत्वं मनुभूतित्वमिति चेन्न। नस्वव्यतिरेकेण
स्वकार्यस्यापरिच्छेदात्तस्याज्ञातत्वात्। ज्ञातवनास्मृतिरपि तथास्यात्। तस्याश्चेपि दिस्वीत्यत्ता
त्ववापरापज्ञानार्थपरिच्छेदेत्यर्थव्यवहारः स्वविकार्य इत्यस्य प्रयोगमेपि तथा। शब्दानुमा
नयोरिवस्मृतेरपि व्यवहारहेतुत्वेपारतंत्र्यात्ततावात्। ज्ञातवास्मृतेरात्मस्वात्मनोर
पितथा। ज्ञातवनानुभूतित्वेनस्यात्। तयारंशयोः सर्वत्वे विसंवादकरणात्त्वनपरानपेक्ष
त्वमितिचेन्न। नांशेतरस्यापि प्राधान्यकरणवातनत्वात्। स्वात्मव्यवहारसमर्थत्वेन ज्ञा
तायाः संविदो विषयव्यवहारस्यासमर्थ्यादिव्रंतोरणपश्चाद्भवतीति वाच्यं। कार्यगतेश ६

कीनां कार्ये कारणादेव कार्येणसहोत्पत्तेः। अन्यथा विरन्यव्यापारप्रसंगात्। नत्वशब्दानुदिक
भेणामनादृतानां विरन्यव्यापारउपपद्यते। स्वसमानविषयव्यवहारहेतुत्वं विदं तरानापेक्ष
त्वमिमत्वमनुभूतित्वमिति चेन्न। तर्हि स्मृतिज्ञानस्यावधांशेपनुभूतित्वापत्तेः। नहितदिति
व्यवहारस्यहेतुर्वाभिनवकार्येणहमिति व्यवहारेणसमानविषयत्वं। एकस्यउपवर्तमानको
ज्ञावच्छिन्नवस्तुविषयवादेतीतकालात्मवच्छिन्नवस्तुविषयवाद्यानायस्या। अन्यथा द्वयोर
पिसमानविषयत्वेनतत्वेदंताव्यवहारद्वयस्य संकरप्रसंगात्। शब्दानुमानयोरपि विम
र्शापेक्षत्वेनावधेनानुभूतित्वं चेत्तत्र वेद्यविमर्शस्या। स्वसमानविषयव्यवहारहेतु
नै

सविदंतरानपेक्षत्वात्। सुखादिकमपि विदंतरानवच्छिन्नार्थविषयायां विदनुव्यवसितिरिति चेत्। नहि
स्वतःप्रतिभासविषये व्यवहृतिः स्यात्। वक्ष्ये ज्ञानानुमितिर्येनलौकिकवाक्यजन्यस्य वेदेऽपिय
एवं विद्वान्नित्याघटत्वादरकवाक्यजन्यस्य ज्ञानस्यानुव्यवसितित्वं नस्यात्। स्याद्वा विमर्शस्या
नुव्यवसितित्वेन प्रामाण्यं किं चात्र सर्वत्रापि यदि न शंखादिविभ्रमाः प्रमाणं जावयुः। तन्नरूपम्
विशेषनिरंतरज्ञानमात्रत्वेन प्रामाण्याधिकरणेऽपि मन्वलतोऽवच्छेदस्कार एव प्रामाणिकैः करणीयः
एतेन साक्षात्प्रतीतिः प्रत्यक्षमिति तेषां प्रत्यक्षलक्षणमपि परास्तं। यथाहुः साक्षात्प्र
तीतिः प्रत्यक्षं नियमात्निष्प्रमाणकमिति। ननावश्यकमात्रगुणस्य सता ज्ञानस्य साक्षात्वं ७

ज्ञानग्रहमात्रत्वेन२ ससर्गप्रत्यये१

नामान्तरजातीरस्ति गुणानामवान्तरजात्यनभ्युपगमात्। न चैतद्व्यतिरेकेण साक्षात्वं ना
म किंचिद्स्य संभवति। न चादिः। तर्हि प्रतीतः प्रतीत्यंतरानवच्छेदितेन्द्रियजन्यत्वं स्वविषये प्रती
त्यंतरानवच्छेदितत्वं स्वकालावच्छिन्नस्वस्वभावात्त्वं पदार्थस्वरूपविषयत्वं। स्वज्ञानविषयो ज्ञा
नीयत्वमस्तत्वस्त्वंतरत्वाद्व्यवस्थाविषयत्वं वस्त्वंतरप्रतीतिनिरपेक्षस्वरूपदीतत्वं वा
नहृष्टसुरसमस्तवस्त्वंतरव्यावृत्तवस्तुव्यवहारोत्पादनशक्तित्वं इदमहं जानामीति त्रित
यव्यवहारोत्पादकत्वं वा। किंचिदमंतरं वा न प्रथमः परोक्षज्ञानानां गमादिसंविदां स्वात्मात्मनो
रव्यवहितत्वाद्यापातात्। न द्वितीयः नोदनाजनितायाः संविदो वेद्येऽपि प्रत्यक्षत्वापातात्। सा

नौ१

धिविमर्शोपवादितेतिचेन्न। तर्हि विमर्शस्याप्येवेद्यपि प्रत्यक्षत्वं स्यात्। प्रमाणत्वे स्मृतिविशेषविषयत्वमि
तिचेन्न। तर्हि प्रमानस्य प्रत्यक्षत्वे हेतुत्वप्रसंगः। न तृतीयः। अनुमानादावपि तथात्वात्। स्वकालेस्म
तएवार्थस्यावभासकत्वे नियम इतिचेन्न। अन्यायं नियमो नान्यत्रेति मशकाभावात्। अन्तर्वि
षयस्य ज्ञानं प्रति हेतुत्वं न त्वायं नियमः। असतो ज्ञानं प्रति हेतुत्वायोगादितिचेन्न। एवं स्मृति स
वेद्यविषयस्यात्मन्यप्रत्यक्षत्वप्रसंगः। स्वात्मनिश्चयाद्धेतुत्वायं न वाता। स्वविषयत्वान
न्यपगमात्। स्वकालविशेषितार्थविभासकत्वमितिचेन्न। तर्हि निर्विकल्पकस्यास्मवेद्यसंविदं ८
स्यात्मालनोरप्रत्यक्षत्वापातः। न च उर्थः। तत्र यदि वस्तुस्वरूपं मानाद्यादित्यक्षातद्विष

यत्वं विसात्प्रतीतिरित्युच्यते। ततः प्रत्यक्षसमानविषया स्मृतिरपि तथा स्यात्। यदि स्वय्यक्ति
यं स्वरूपमिति ज्ञात्यादिधर्मनेदप्रतीतिः। तर्ह्यनुमानादेरपि तथात्वं प्रसज्येत। यदा स्वस्य
न रूपं स्वरूपभिन्नसाधारणधर्मप्रतीतिः तदाङ्गुत्वादिविषयस्य साधनानेति व्याप्तिः। नचा
प्रतिवन्धासाधारणधर्मदर्शनं। अथ स्वमेव रूपं स्वरूपं रूप्यते नेनेन पर्यं विदितिवरूपं तेन या
वस्तुरूपेण स्वात्मना वस्तु विषयीकरोतिसा साक्षात्। प्रतीतिर्निर्देवमनुमानादावितिचे
न्न। तर्हि सविकल्पकाप्रत्यक्षत्वप्रसंगः। तत्र नामादिमिरूपाणां विषयीकरणात्। स्ववि
षयं न ग्रन्थप्रतीत्यन्तरावपदितत्वं स्वरूपप्रतीतिरिवमितिपक्षोपि स्मृतत्स्वात्मनोनार

प्रत्यक्षेणोपात्तेन निरस्त एवानर्थक्यम्। उक्तादिलिङ्गविषयस्य राद्यनुमानेऽतिव्याप्तेः। सजातीयविजा-
तीयसमस्तवस्तुदर्शनाशक्तेः सिद्धा ह्यविप्रत्ययासंतवाच्च वस्तुतो व्याहतेर्वस्तुविषयमात्रेण
प्रत्यक्षत्वेऽनुमानादेरपि तथात्वं स्यात्। तेनापि सम्यनिर्विकल्पकस्यापीहेमेव सविकल्पकेन वि-
कल्पितरूपग्रहणमिति विकल्पस्याप्रत्यक्षत्वप्रसंगात्। उत्पत्ताववविकल्पस्य तदपेक्षा-
नस्वविषयस्येरग्रहणादिति चेन्न धूमादिविषयस्येवाद्यनुमानेपि स्तुवचनचोताद्भ्रां
प्रमाधर्मराणधर्मदर्शनसापेक्षाजदप्रतीतेरप्रत्यक्षतावस्थादिति। निर्विकल्पकस्यैवि-
दृष्टित्वयव्यवहाराङ्गत्वाभावेनास्य समः प्रदोपीनकश्चीकार्यः। अस्मन्मपि विकल्पं ९
नृः

विकल्पयामः। किं विद्यमानैस्तरमनुमानादिसंविदामस्ति वा न वेति। यद्यस्ति तासामपि प्रत्यक्षत्वप्र-
संगः। मा ह्याव विशेषणस्य च वैघातावि न वैयर्थ्यं वापघात। यदि नास्ति तासां स्वात्मात्म-
नोरपि प्रत्यक्षता व्याकोपः स्यादिति कृतं विस्तरेण। अनतिततेह्यपेतेपदेत्ते हा मंदमती-
नां विभ्रमो मा भूदिति पृथग्गुणपञ्चस्या निरस्ता इति॥ ॥अनधिगततथाभूतार्थनिश्चा-
यकं प्रमाणमिति मीमांसाचार्याः। यथाह्युक्तं तस्माद्दृढं यदुत्पन्नं नापि संवादमृच्छति। ज्ञा-
नांतरेण विज्ञानं तत्प्रमाणं प्रतीयतामिति। तदपि न चतुरस्रमिव दृश्यते तथा हि क्षणिक-
संवादिनां दुष्टेन्द्रियाणां बाध्यादिविषयभ्रमादिलिंगविभ्रमाणां भ्रान्तविप्रलंभकवा-
क्यानां प्रत्यक्षप्रामाण्यापत्तेः। अकलवदज्ञामाण्यप्रसंगाच्च यत्रैकत्वनरोऽन्यनिविरार्थ

स्य सर्वैरधिगतत्वेनानधिगतत्वस्य सर्वैर्ज्ञानाभावात्। अधिगतत्वसंदेहेऽपि प्रामाण्यानिश्चयात्। एत
स्मिन्क्षणेऽन्यैरनधिगतत्वं विवक्षितमिति चेत्। न। तत्रैवाधिगतविस्मृतावदार्थीनां उप
स्थापकाणां सदा प्रामाण्यप्रसंगात्। न तत्राधिगतप्रतिसंधानमस्तीति चेत्। न। अनुवादकवा
क्या। नां स्मृतिप्रमोषाणां च प्रामाण्यापातात्। अधिगतविषयाणां चाप्रामाण्येनानाशाखागता
नेकार्थगोचराणि वाक्यान्यप्रमाणं स्युः। न चैतेषां प्रतिपत्त्ववस्थयानधिगतत्वं वा
च्यं। नाव्येकं प्रतिशिष्य इति न्यायात्। सर्वशाखाविदिति कर्तव्यताकलापोपसंहा १०
रसमर्थानेन सर्वेषां सर्वे प्रामाण्योपगमात्। किं निर्बंधनश्चाधिगतविषये प्रवेश
त्रै ल्पा।

क्षितत्राधिगत्यंतरानुत्पत्तेः। उत्पत्तावपि तानपेक्षितत्वात्। सर्वाविशिष्टत्वाद्वा। न प्रथमः। साम
ग्र्यप्रतिबंधेन प्रमितेऽपि प्रमांतरोत्पत्तिदर्शनात्। न द्वितीयः। प्रमात्रपेक्षानधीनत्वात्। प्रामाण्यस्य
अन्यथोपेक्षादिफलानामप्रामाण्यापातात्। न तृतीयः। उत्तराविशिष्टत्वेन सर्वप्रामाण्य
स्यापि सुवचत्वात्। अविशेषेऽपि तदनपेक्षत्वेन तस्याप्रामाण्यमिति चेत्। उत्पन्नमितरत्रापि।
अधिगतविषयस्य प्रामाण्ये स्मृतेरपि तथात्वप्रसंग इति चेत्। न। स्मृतेरनुभवत्वेनात्र
मात्रत्वात्। यावदर्थमेव प्रमात्वनिमित्तमस्त्विति चेत्। न। स्मृतित्वलोपः। संस्कारस्य महत्विनि
मित्तत्वेनापरिसंख्यानात्। नाप्यकं तत्रार्थिनः। अस्याः हानकारिफलत्वेनाप्रत्यक्षत्वात्।

सत्तामात्रबोधकत्वेनानुमानाद्यनंतर्निविष्टा। न च याथार्थ्यमपि स्मृतेरस्ति। नहि यद्यादृ
शोर्थः स्मर्यते तत्तदा तादृशोऽस्ति। पूर्वावस्थाया निवृत्तत्वात्। न च निवृत्तपूर्वावस्थतया तमर्थं
स्मृतिरालंबते तथानुभूतत्वात् तेन समानविषयत्वेऽपि स्मृत्यनुभवयोरनुभवकालेऽर्थ
स्य तादवस्थ्यात् स्मृतिकाले तु तादवस्थ्यादेकस्य याथार्थ्यमन्यस्यायथार्थत्वमप्युप
पद्यत एव। इदं तद्वस्त्वित्यत्रापि याथार्थ्यं पाकरक्तेऽपि श्यामताप्रत्ययो यथार्थः स्या
त्। तेनायथा स्मृत्यापि यथार्थं हि न वक्तुं नितरां तेन यथार्थत्वव्यपदेश इति याचितमं
डनकमनीयकमिव स्मृतेर्याथार्थ्यं। किंच। अस्मत्पक्षे धारावाहनबुद्धयो न प्रमा तं स्मृ ११

नित्या

स तत्र नैकान्तिकत्वाविशेषात् कलितवस्तुनि तस्मिन्नाधिकविषयत्वं वाच्यं। कालाकाशदिशाम
प्यपि द्रव्यत्वेनात्मवदप्रत्यक्षत्वेऽप्यवस्थितत्वात्। दिक्कालयोश्च विशेषगुणशून्यद्रव्यत्वेन
मनोवदप्रत्यक्षत्वेऽप्यवस्थितत्वात्। इयं नं काले घटमदेन वृत्तत्वमित्यनुव्यवसायद
र्शनात् कालस्तेदोऽचर्मीयत एवेति चेत्। न दिङ् इयत्तं कालं घटमदमस्माक्षमित्यत्रापि का
लस्तेदाधिको न स्मृतेरपि प्रामाण्यं स्यात्। अप्रत्यक्षत्वे कालस्यासिद्धिरवश्यादिति चे
न्न। अनादिग्व्यतिरिक्तपरापरप्रत्ययोऽव्यतिरक्तसंयोगनिमित्तो परापरप्रत्यय
त्वात्। दिक्संयोगनिमित्तपरापरप्रत्ययवदित्यनुमानादेव तत्त्वसिद्धिः। न च स्वरूपे

घटिच्छिन्नत्वनिमित्तं ज्ञातृत्वेन तस्याः पदार्थैः संबंधं भातानवभासकत्वात्। घटादिविशि
ष्टज्ञानयोगित्वेन तयोः स्वत्वनिमित्तत्वावेगात्। प्रत्यक्षत्वेयिकोलक्ष्यत्वात्नेदाभावात्। अपा
धिकत्वेऽस्य चोपाधीनां स्वयोगत्वादीनामनवगमात्। अवतास्मात्संनवाज्ञतद्विशिष्टवस्तुप्रती
तिः संभवति। प्रतीत्याणावर्त्तिव्यक्तुत्वमितस्याद्या। डिज्ञानेचोपाधिरिति चेत्। तर्हि डिंडी
माजल ज्ञानांतरितत्वेन घटज्ञानसंतानविच्छेदः स्यात्। स्याच्च तदुपाधिकोलभेदाके
लेनैवव्यक्तीनामपि प्रामाण्यं। एतेन ज्ञानतावापाधिरिति निरस्तम्। तस्यां च न किं
चित्त्वमात्रोपरूपामनः ज्ञातो घटः प्रकटो घट इति विषयविशेषणत्वेन साध्यत्वमी। स्व १२

तएवेति चेत्। मा ज्ञानस्यैव तथा प्रतीतिः कथमात्मसमवेतस्य संवेदनस्य विषयसामा
नाधिकरण्येन प्रतीतिरिति चेत्। तर्हि विद्धो घट इष्टो घटः प्रशस्तोयं घट इति च सामाना
धिकरण्यवद्वरानानोपपत्तेतो इच्छा मायुष्मता। तत्र ज्ञानजन्यफलाश्रयत्वमंतरे
मैः सार्थः कथं कर्मत्वमिनो घं गत्वे ग्रावेगागतं। इष्टादिजन्यातिशयाभाववपिकरणाद्यापा
र विषयत्वमात्रेण कर्मत्वोपपत्तेः। ज्ञानं चवनीतादि क्रियाकरोति क्रियात्वात् गमनवदित्यनुमाने
न ज्ञाततासिद्धिरिति चेत्। न कार्यत्वे सति विभुद्रव्यसमवायेनाविद्यगुणत्वात् ज्ञानस्याक्रिया
त्वासिद्धेः क्रियाभात्वधर्मात्रेण्यादिच्चापगामसिद्धं योगादिसिद्धानैकांतिकत्वं। तथा मयि किं चिंके

श्री

लिंगं प्रामेऽनवस्था स्यात्। तथाहि। अनैकांत्यादरसिद्धेर्हेतोर्लिंगमिदं क्रिया। तद्विशिष्टप्रका
शान्नान्यथाऽनुत्तवोधिके इति। ज्ञाततानुमेयग्राह्यज्ञानस्य कथं तदनावसिद्धिरिति चेत्। नन्वा
त्तिकात्। विशेषगुणत्वेन तस्य सुखादिवन्मानसप्रत्यक्षेण सिद्धिः। तर्हि तद्वद्देवायुस्पर्शितथा
त्प्रत्ययेन विपर्ययं तरस्थैवारोऽनस्यादिति चेत्। न। निश्वासप्रश्वासहेतुभूतप्रयत्नयत्नेनानैकांत्या
त्। तस्याप्यनुमितिविषयत्वावगमेऽनुपलब्धिरमणरूपविषयांतरसंचारान्नकारिति
दुस्तरं व्यपनमापतितमिति संतं प्रयत्नकाकुप्रयुक्तेति॥ ॥ एवं प्रमाणत्वमात्मनं लक्षयि १२
त्वा तद्विशेषान्वक्ष्यं विभागेनादिशति॥ ॥ प्रत्यक्षमनुमानाख्यमुपमानं तथागमः

प्रमाणं चतुर्विधं ज्ञेयमक्षपादेन लक्षितं॥ ॥ एतानीयंत्येव प्रमाणानि नान्यानि नाधिकानि न न्यू
नानि वेति। न्यूनाधिकसंख्यासंख्येयांतरव्यवच्छेदो विभागो देशप्रयोजनं। वादिप्रसिद्धतार
तम्यमत्र हेतुः स्तोत्र क्रमानुरोधिदृष्टवानिति॥ ॥ तदुक्तं। प्रत्यक्षानुमानोपमानशब्दाः प्र
माणानीति। अक्षपादशब्देन सूचितं मतांतरे तु न्यूनाधिकसंख्याकप्रमाणांगीकारं विवृणो
ति॥ ॥ प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः। अनुमानं च तच्चापि सांख्याः शब्दं च ते अपि
न्यायैकदेशिनोऽप्येवमुपमानं च केचन। अर्थापत्त्या सहैतानि चत्वार्याह प्रभाकरः। अभाव
षष्ठान्येतानि भाट्टा वेदांतिनस्तथा। संभवैतिह्ययुक्तानि तानि पौराणिका जगुः॥ ॥ अत्र

र्थापत्त्यादीनामप्यनुमानाधीनत्वं स्यात् इत्युद्देशक्रमानुरोधेन प्रत्यक्षं लक्षयति। अपरो
क्षप्रमायाः संप्रत्यक्षं॥ ॥अपरोक्षं साक्षात्वं न च लिंगीकज्ञानव्यापारत्वे ऐंद्रियकज्ञानानुगतः
कश्चित ज्ञानत्वावांतरजातिभेद इत्यग्रे निवेदयिष्यति। अपरोक्षप्रमायाः संप्रत्यक्षमिति व
चनं ईश्वरस्यापि प्रत्यक्षं न स्यादिति। तथाहुः। तन्मे प्रमाणं शिव इति। अन्यथा लौकिकप्रत्य
क्षमात्रविवक्षायामिंद्रियकप्रमासाधकतमं प्रत्यक्षमित्यलक्षयिष्यदिति॥ ॥तद्विभागमा
हा द्विविधं च तत्॥ ॥तदेव विधा विभज्य दर्शयति॥ ॥सविकल्पकमित्येकमपरं निर्विकल्प
कं च। तयोर्लक्षणमाह॥ नामादिविशिष्टार्थविषयं सविकल्पकं॥ ॥अविशिष्टार्थविषयं प्र १४

त्यक्षं निर्विकल्पकं॥ ॥नामजातिगुणद्रव्यक्रियादिविशिष्टमर्थं विषयीकुर्वत्प्रत्यक्षं सवि
कल्पकं। यथा देवदत्तोऽयं ब्राह्मणः शुक्लो दंडी गच्छतीत्यादि। नामादिविशेषणविवर्जितस्वल
क्षणमात्रविषयं निर्विकल्पकं॥ ॥यथाहुः। अस्ति ह्यालोचनज्ञानं प्रथमं निर्विकल्पकं। बाल
मूकादिविज्ञानसदृशं शुद्धवस्तुजमिति। निर्विकल्पकमेव प्रत्यक्षमाक्षिपंत सौगताः। य
थाहुः। कल्पनापोढमभ्रांतं प्रत्यक्षमिति। तदसत्। ग्राह्यांशे कल्पनानां भ्रांतत्वेनाभ्रांतमदे
नेकत्वाद्वृत्तिविरोधात्। कल्पनापोढविशेषणवैयर्थ्यात्। किंच विवादाध्यासितो विकल्पः
स्वगोचरप्रत्यक्षः। प्रमाणत्वे सत्यपरोक्षावभासित्वात्। निर्विकल्पकवत्। नन्वत्र वि

[illegible]यतः साक्षिलमथस्ताद्विकल्पानां प्रामाण्यं॥ ॥शाब्दिकास्तु सविकल्पकमेव प्रत्यक्ष
नाङ्गीयथा। न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन दृश्य
तइति॥ ॥तदपिन॥ अशब्दीतस्यबंधनां शब्दानुल्लेखिनः प्रत्ययस्योत्पत्तेः। इतरथा त्वेंद्रि
यसंयोगानंतरमविशिष्टविषयापरोक्षावेत्तायस्य दुरपह्नवत्वात्। अन्यथा विकल्पयो
वा उदयप्रसंगात्। बाल्यदर्शनेन हि प्रतिसंबंधिवाचकस्मृतिराविरस्ति॥ ॥यथाहुः। यसंज्ञा
स्मरणं तत्रैतदपेक्षते उक्तंपिंडएव हि दृष्टस्सन्संज्ञां स्मारयितुं क्षम इति पिंडदर्शनस्यावें १५
द्रियव्यतिरिक्तेन कारणांतरस्योपजनकात्तत्तस्मात्तदुत्पन्नं यत्तदपि प्रत्यक्षमिति नै

यायिकाः। यदुक्तं त्रयत्। इंद्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यव
सायात्मकं प्रत्यक्षमिति। अत्र ह्यव्यपदेश्यं व्यवसायात्मकमिति च निर्विकल्पकसविकल्प
कयोर्ग्रहणं। व्यपदिश्यते व्यवच्छिद्यतेऽनेनेति व्यपदेशो विशेषणमुपजन्हणं वा नामजा
त्यादि। तदर्हमव्यपदेश्यं। अवच्छेद्यमिति यावत्। तत्र सदस्य ज्ञायमानाधिकरणं व्यवच्छेद
कं विशेषणं वाधिकरणं तदुपलक्षणं। यथा दंडी देवदत्तो येषां जटाजिह्वा तापसा इति। अवि
षयानं विद्यदेश्यं यस्मिन् जात्यादिस्वरूपमात्रावगाहि न तु तेषां मिथो विशेषणविशि
ष्टतावगाहीतियावत्। व्यवसायो विनिश्चयो विकल्प इतियावत्। तदेवात्मा स्व

२

स्वरूपं तद्वत्साधारणकमिति। अथानुमानं लक्षयति॥ ॥व्याप्तिग्रहणसापेक्षप्रतीतेः साध
नं लिंगमनुमानमिति व्याप्तिर्वक्ष्यमाणलक्षणा यद्ग्रहणमपेक्ष्य प्रमितिसाधनमनुमानं। प्र
त्यक्षादीनां तु प्रमेयव्याप्तिग्रहणापेक्षा नास्ति। लिंगग्रहणविशेषणेन तेषां नि
रासः। लिंगपरामर्शोऽनुमानमित्याचार्याः। तत्र लिंगलक्षणमुत्तरत्र वक्ष्यति। परामर्श इ
ति प्रतिसंधानात्मकं तृतीयलिंगविज्ञानमित्यलमिति॥ व्याप्तिलक्षणमाह। व्याप्ति
संबंधो निरुपाधिकः। सोपाधिकसंबंधवतां तेषु तनयत्वादीनां व्याप्तिर्मा भूदिति निरु १६
पाधिक इत्युक्तं। स्वाभाविकः संबंधो व्याप्तिरिति यावत्। कस्तावदुपाधिर्नाम यद्विरहः।

संबंधो व्याप्तिरित्यत आह॥ साधनाव्यापकाः साध्यसमव्याप्ता उपाधयः। यावत्साधनदेशमव
र्तमानो यावत्साध्यदेशवृत्तिरुपाधिः। यथा विषदिग्धायां हिंसात्वेनाधर्मत्वे साध्ये निषिद्धत्वमु
पाधिः। तद्धि साध्यमधर्मत्वं व्याप्नोति न व्याप्नोति च साधनं हिंसात्वं। पदमेव विष
दिग्धायां सत्यपि हिंसात्वे तस्याभावात्। साधनाव्यापक एवेत्यनुमाने अनित्यसाधने दृ
तके सावयवत्वमुपाधिः स्यात्। तत्र हि क्रियादिमत्त्वे सत्यपि सावयववत्त्वाभावेन
साधनाव्यापकत्वात्। न तत्र साध्यव्यापक इत्युक्तं। न हि तत्सावयवत्वं साध्यमनित्यत्वं व्या
प्नोति। अनित्ये चेव क्रियादिमत्त्वाभावात्। इति साध्यव्यापक इत्येवाभिधीयते। तन्नोप

नित्यत्वसाधने सावयवत्वे तत्कत्वमुपाधिः स्यात् । तस्य साध्यमनित्यत्वं व्याप्तेः साधनव्यापकत्व
त्कले पुनस्तस्य सावयवत्वव्यापकत्वादनुपाधित्वं । निरुपाधिकसाध्यसंबंधो नयः ॥ ॥ यथा
ऽक्तं ॥ ॥ कृतकत्वं सावयवत्वादि प्रयुक्तो वा विनाशितेति । तस्मात् प्रयोजनवत्त्व विशेषणस्य
योपादानं ॥ ॥ यथाऽक्तं ॥ ॥ एकसाध्यमविनाभावमिथः संबंधस्य योः साध्यसाधनावाविनाभावी
कउपाधिर्येदत्ययइति ॥ ॥ अन्यत्राप्युक्तं । कः पुनरुपाधिः स्यात् प्रयोजकं निमित्तान्तरमिति ।
क्रिमश्रमण्णां । साधनाव्यापकत्वे सति साध्यव्यापकत्वमिति । स्फुटिकगतत्वेन रक्तता प्र
तीतौ जपाकुसुमं साधनाजिमत्तगतत्वेन स्वधर्मरक्ततायाः व्याप्तेः प्रतिनाशनिमित्त १७

त्वेनास्योपाधित्वव्यपदेशाइति । उपाधिर्द्विविधमाह ॥ ॥ तवं त्रितेव द्विविधनिश्चिताः शंकिता
इति । निर्णीतो नयविशेषणावान निश्चितोपाधिः । यथोदाहृतमेव निषिद्धत्वं । उक्तयोर्विशेष
णयोरन्यतरस्याद्भावशंकायां उपशंकितोपाधिः स्यात् । यथा मैत्रगतत्वेन स्य मरगर्भस्य
श्यामत्वे साध्ये शाकाद्याहारपरिणतिः पक्षेतरे द्वितस्य मगर्भेश्यामत्वोपाधेः स्याकाद्या
हारपरिणामस्याभावानिश्चयात्साधनाव्यापकत्वं संदिग्धमिति तत्र तो शंकितोपाधित्वं ।
ते साधनाव्यापकत्वदृत्यनिश्चितपक्षेतरत्वेत्व्याविवदेत्वात् । न लक्षणेऽप्यंत्यदृ ॥
तदेतदुपन्यस्य विशिष्टोपाधिविद्धराः संबंधे व्याप्तिरिति । अनुमानस्यावांतरजदमाह ॥

अनुमानं त्रिविधमिति तत्स्वरूपं तन्त्रेदानामानस्य शिरःशिं त्रयेलोकऽकोडीकार इत्यर्थः ॥ ताएवद्वि
धा विभजते । अन्वयी व्यतिरेकी वा अन्वयव्यतिरेकीति ॥ ॥ तदुक्तं । तत्पूर्वकं त्रिविधमनुमानं
पूर्ववच्छेषवत्सामान्यतोदृष्टमिति । अत्र तदिति व्याप्तिज्ञानं लिंगदर्शनं चापरामृश्यते तेद्व
यस्य लिंगप्रतिसंधानस्य च तत्पूर्वकं । तत्र तत्पूर्वकमित्येतावता सामान्यलक्षण
मुच्यते । शेषेण सामान्यतो विशेषतश्च विभागो दर्शितः । तेषां त्रयाणां विशेषलक्षणानि ध्यानंत्र तिडानाति
तावत् ॥ ॥ तेषां लक्षणमुच्यते ॥ तत्र केवलान्वयिनो लक्षणमाह । सर्वस्मिन्केतु विद्यापि सपक्षेऽस्तु मन्व
यि । विपक्षेऽसत्वं पक्षस्य व्यापकं केवलान्वयि वक्ष्यमाणलक्षणः पक्षाद्यः । तत्र पक्षीसतेषु स १८

वर्तमानसर्वेषु

र्वे स्वसिंकितपक्षेषु वा सपक्षेषु वर्तमानमविद्यमानविपक्षं केवलान्वयि । यथा सर्वो नित्यत्ववादी कश्चि
दनित्यत्वेनासंप्रतिपन्नान् घटादीन् सपक्षीकृत्य प्रयुंक्ते । विप्रतिपन्नं सर्वमनित्यं प्रमेयत्वाद् घटवदिति ।
तद्धि स्वकलसपक्षवर्तिनः शब्दादेरनपक्षैकदेशवर्त्तिनस्तु धर्मादेः कस्यचित्प्रयत्नः । मीमांस
कानां मते तु वायुः सुखादिवदिति मीमांसकाप्रत्यक्षत्वं द्विविधं तु दिक्षुनवत्तीतवर्तीतत्वा
त्मसुखादिस्थितिजवतिसपक्षैकदेशवृत्तिः । अन्वयो न यत्रापि विशेष्यापि विपक्षमपक्षे कोटिद्वयं
तत्र वाद्विपक्षाभावद्विति केवला व्यतिरेकिणं लक्षयति । सपक्षे विपक्षेभ्यो व्यावर्त्तमानत्वे
मिसु सर्वासु वर्तमानं यत्केवलव्यतिरेकि तत् । सपक्षे विपक्षेभ्यो व्यावर्त्तमानं सर्वासु पक्षेषु मिसु
वर्तमानं यत्केवलव्यतिरेकि । अत्र विपक्षाव्यावृत्तिकथनेन विपक्षसत्ता दर्शिता । सपक्षाद्व्या

ष्टेसेरवा द्यानिश्चनत्वात्॥ ॥यथा॥ ॥सर्वज्ञप्रणीता वेदाः वेदत्वात्। यः सर्वज्ञप्रणीतो न भवति
नासौ वेदः यथा कुमारसंभवादीनि। यथा॥ ॥सर्वं सकर्तृकं सर्वं कार्यं कदाचित्कत्वात्। य
त्सकर्तृकं साध्यं न भवति। तद्धेतुसाधनमपि न भवति। यथा गगनमिति। अत्र द्वित्वं व्यापि कार्यं ज्ञात
त्वप्य तच्चेनस्वीकारात् वा कार्यस्य विपक्षत्वाभ्युपगमे वा विद्धि इति शिष्यकृत्याद्दनाय। सायोगिकं किं
विराद्धा॥ ॥असाधारणधर्मत्वाद्व्यतिरेकोऽन्वयलक्षणं लक्षणं नाम यदुच्यते। तदपि केवलव्यतिरे
कि स्वरूपमनुमानमेव कुतः। लक्ष्यस्यासाधारणधर्मो लक्षणं भवति। केवलव्यतिरेकि च स
पक्षैकवृत्ति वा सत्यपि विपक्षे तत्राविद्यमानत्वात् सपक्षैकवासाधारणं यत्तान्त द्विरत्नादिम
त्वं गोर्लक्षणमित्यत्र कथमस्य व्यतिरेकरूपात् तन्निवृत्तेरुच्यते एतद्रूयतामवेधाननायं २७

द्वा

गौरितिव्यवहर्तव्यः सास्नादिमत्त्वात्। न यदेवं न तदेवं यथा महिषादिरिति। तयोरेव हेतुदृष्टान्तयो
गौरितरभेदो व्यावर्त्तत्वेति प्रतिज्ञा हेत्वा॥ नाचैतदसांप्रदायिकं। अथ किं लक्षणं का भावितीत्यत्रा
ह। तदा केवलव्यतिरेकि परं स्यात् लक्षणस्य तथात्वादित्यादिकं च बहुप्रदेशे सुन्यायवार्थे
लक्षणस्य व्यतिरेकित्वेन व्यवहारादिति यद्यसाधारणो धर्मो लक्षणादिपदपर्यायः सवाच्यो व्य
तिरेकीति तर्ह्यसाधारणानैकान्तिकरूपो हेत्वाभासः स्यात्। एवमयं तावदित्याशंक्याह॥ ॥सपक्षे सति
वा नास्ति सपक्षो वा साधारणास्य च सपक्षेऽतिविपक्षेत्रावर्त्तमानः पक्षमात्रवृत्तिर्हेतुरसाधारणा
नैकान्तिको नाम नामनृस्यात्। यथा नित्या पृथ्वी गन्धवत्त्वादिति। अत्र दिग्गगनादि सपक्षे

सपक्षमात्रवर्त्तमानं पक्षसत्त्वमिमात्रवृत्तिर्गंधवत्त्वमात्मनो न वेति। अविद्यमानसपक्षः केव
लव्यतिरेकीत्यक्रमेवेति भावः॥ ॥अन्वयव्यतिरेकिणो लक्षयति॥ ॥व्याप्त्या वर्त्तते यद्विपक्षे सपक्षे तु
तान्वयं चास्यापक्षे वर्त्तमानमन्वयव्यतिरेकि तत्तु। विपक्षे अवृत्तिवक्तव्येनास्य केवलविपक्षे
व्यावृत्तिर्दर्शिता। तत्रान्वयमिति सपक्षान्वयमात्रं विवक्षितं न तु व्याप्तिरिति पक्षीदातस्य केवल
धर्मिव्याप्तिः पक्षयोरिवान्नोपि विपक्षेतेति निदर्शितं। व्याप्त्यावर्त्तमानमिति॥ ॥यथा॥ अनित्यः शब्दः कृ
तकत्वात् घटवत् इति अत्र हेतुर्व्यापकः सत्तकत्वस्य सार्वधर्मिक्य अनित्ये घटे वृत्तेः। तयोरेव साध्यदृष्टांत २०
योः सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वादिति अपरो कारणशब्दत्त्वेः अनित्येषु घटादिषु

कादिषु वृत्तेः द्व्यणुकादिष्ववृत्तेरिति॥ ॥पक्षादिलक्षणमाह॥ पक्षः साध्यवत्त्वेनेष्टो धर्मी साध्यजाती
यधर्मवान्। सपक्षोऽथ विपक्षस्तु साध्यधर्मनिवृत्तिमान्॥ अत्र साध्यधर्मविशेषवत्त्वेन सपक्षत्वेय
सेपि सपक्षः स्याद्रिक्तकं साध्यजातीयधर्मवान् सपक्ष इति एवं साध्यधर्मनिवृत्तिमानित्यत्रापि
साध्यधर्मविशेषस्य सजातीयधर्मस्य च निवृत्तिमान् विपक्ष इति विवक्षितं। अन्यथा साध्यधर्म
विशेषनिवृत्तिमात्रेण विपक्षत्वे सपक्षस्यापि तथात्वात् द्विपक्षत्वप्रसंगः॥ ॥प्रकारांतरेणानुमा
नद्वैविध्यमाह॥ दृष्टसामान्यतो दृष्टमिति नाम्ना विधम्यया। दृष्टं प्रत्यक्षयोग्यार्थं तद्योग्यार्थमनु
[illegible]विशेषतो दृष्टं सामान्यतो दृष्टमिति च द्विविधमनुमानं भवति। तत्र प्रत्यक्षयोग्यार्थ

नुमायकं विशेषतो दृष्टं यथा धूमादि । नित्यातींद्रियार्थानुमायकं सामान्यतो दृष्टं यथा च सुराघ
नुमायकं रूपादिज्ञानं । स्तोगता स्वता दात्म्यात्तदुत्पत्तिभ्यामेवाविनाभावः न तत्र कार्यत्वेनै
कारणमात्मीनं नानुमापयति । यथा धूमाद्धूमध्वजानुमानं क्षितिपाबाह्य दावानुमानं चेति प्रति
पत्तिः ॥ यथाह ॥ कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् । अविनाभावनियमो दर्शनान्न
न दर्शनात् ॥ तदयुक्तं ॥ अकार्यानात्मनोरस्मादहर कारणानात्मभूतस्य रूपाद्यनुमानस्य जोके
दृष्टत्वानुपलब्धेः किं च व्याप्तिर्नाम संबंधविशेषः । स च नेदस्या नाधिकरणम् इति कथं तत्प्रति
पन्हे तादात्म्ये ज्ञागमके ज्ञाविनमा स्यात् । किं वा लिंगलिंगिनोस्तादात्म्ये लिंगज्ञानं एव लिं २१

गिनोपि वृत्तीति प्रसंगादनुमेयं नावशिष्यते । लिंगलिंगिनोर्व्यतिकरश्चात्र प्रसज्येत । न हि तादात्म्ये स
त्येकं व्यतिकरतिनान्यादिति स्वं जातु वेटीति । सामान्यविशेषात्मनानेदांगीकारे ह्यनुमेयाभावः न ह्य
स्ति संतवः । सामान्यमनिश्चितं निश्चितस्तु विशेषः इति न वतस्मिन्सति नावभान्तं तत्कार्यत्वं । अ
पि तु यत्नेव ना वाः स्वबा विनाभाव एवेति । न कार्यत्वात्तदविनाभावं वदन्तः आत्माश्रयदोषाप
त्तिरिति तत्तं विस्तरेण । एवंप्रकारमनुमानं लक्षयित्वोपमानं लक्षयति । प्रसिद्धेत्यत्र मारोप
२१ तवाक्यार्थस्य संज्ञिनि । प्रत्यक्षे प्रत्यभिज्ञानमुपमानमिति रोच्यते । अस्यार्थः नाम्नेनाग्रहीतसंग
तिके नमदेनोपदेशय ज्ञाकमतिादशवा कमितियावत् । तथा योऽर्थस्साधर्म्यादिः । तस्य सर्वे वा

येनानुभूतस्य पश्चाद्वनं गतस्य गवयादौ यत्स्मृत्यन्तरोत्पद्यते ज्ञानं तदुपमानं। अत्र तेनस्मरणमयमर्थं
ज्ञास्मरणाभ्यां यत्तत्समनिवारदनवाक्यार्थप्रत्यभिज्ञानं प्रत्यक्षेणुपमानमिति न्यायाचार्याः।
उपमानं त्रिविधं यथा वाक्यार्थान् स्मरमादौ। अश्वातिदेशवाक्यार्थस्त्रिविधः परिदृष्टस्तातस्या धर्म्य
धर्ममात्रं च वैधर्म्यं चेति तेन उपमानं साधर्म्यादिभेदेनापि त्रिप्रकारो भवति। तद्भेदात्तत्प्रतिपत्तिसाधनात्त्व
कं उपमानमपि त्रिधा भिद्यत इति भावः। तत्र यथा गौस्तथा गवय इत्यतिदेशवाक्यस्य
पश्चाद्वनं गतस्य वाक्यार्थानुस्मरणस्य गामादृश्यपश्यतो गवयव्यक्तावति संभाने अयमसौ गोसदृश
इति तत्साधर्म्योपमानं। वैधर्म्योपमानं कीदृगत्र इति चेत् गवादिवद्विशफानत्ववत्त्ववदर २३

ति अतिदेश इति वाक्याद् उष्ट्रादिवैसादृश्यमधिगतवतः पश्चादेकशफवादिरूपस्यासादृश्यस्य
तुरंगमे प्रत्यभिज्ञानं वैधर्म्योपमानं। धर्ममात्रोपमानं तु उदीच्येनोदीरितं दीर्घग्रीवप्रलंबौष्ठः कठो
रतीक्ष्णकंटकाशी पशुः क्रमेलक इति वाक्यार्थं श्रुतवतो दाक्षिणात्यस्य उत्तरापथं चरतः दर्शनानंत
रमयमसौ तादृशः पशुरिति प्रत्यभिज्ञानं तत्तत्र जनितं साधर्म्यासाध्य साधनं तु उपमानमिति यत्तग
तत्साधर्म्यपदं वैधर्म्यस्य धर्ममात्रस्य चोपमानत्रयाणां चोदाहृतं। यत एव साधर्म्योपमानोदाहरणाति
त्रस्निदर्शनं अन्यान्यथा दृश्यन्त गवादौ साधकारणं। एवमन्योपमानस्य विषयोक्तु
दर्शयति॥ ॥प्रमेयं तत्साक्षात्संबंधः।
त्रिस्य इति वादिविप्रतिपत्तेरुपमानस्य प्रमेयं फलं चादर्शयति॥

संज्ञायाः संज्ञिनासंबद्धा तत्प्रतीतिः फलं न वाक्यमात्रमीमांसानान्तराद्भवेत्तावत् शास्त्रसिद्धसंबंधमनुपमान
स्यात्र मेयं फलं न वन संबंधप्रतिपत्तिः यथा ड्डाः संबंधस्य परिच्छेदः संज्ञायाः संज्ञिनासंबद्धा प्रत्यक्षो
हेस्याध्यवाड्डुपमानफलं न विद्धुरिति । नह्ययं संबंधोऽतिदेशवाक्यादेव प्रतीयते वाक्यश्रवण
समये गवयशब्दप्रवृत्तिनिमित्तगवयत्वस्याप्रतीतेः संबंधिनोऽनवगमे संबंधस्यानवगमत्वा
त् गवयपदादेव तदवगमे परस्पराश्रयप्रसंगापत्तिर्न च गोसादृश्यमेव गोयजदायित्वं शक्यते । अ
दृष्टपूर्वेण गवयत्वेन गोसादृश्यसंबंधादर्शनात् ननु दिड्नागवाणा दृष्टसंबंधादृष्टं हं पुरुषत्व
पलक्ष्यति । प्रतीतमेव गोसादृश्यं गवयपदप्रवृत्तिनिमित्तमस्त्विति चेत् । न तस्य प्रतियो 23

गिनिरूप्यत्वेन प्रतियोगिनमनिधाय तन्निधानानुपपत्तेः प्रतियोगिनो गोरभिधाने गोरवप्र
संगात् । अप्रतीतशृंगामारण्यकानां तत्सादृश्यानवगमेन गवयपदव्यवहारानावप्रसंगाच्चानउ
गवयशब्दो गवयत्वस्य वाचकः अप्रवृत्तिनिमित्तत्वे तरे इति स्तत्र प्रकृते वा । योऽप्रतीतिवृत्तेरयन
प्रवृत्त्यात्मतस्य वाचकः । यथा गोशब्दो गोत्वस्येत्यनुमानादेव तत्संबंधप्रतीतिरिति चेत् ।
नात द्रावककर्तृज्ञानमंतरा लिंगविशेषणासिद्धेः । उपचाराणापि तत्र प्रयोगोपपत्तेः ॥ ॥ य
स्य प्रवृत्तिनिमित्तत्वान्निमित्तत्वाप्रतीतेः समयोद्ग्रहः सर्वेशादेरेनाउ
पा ॥ सादृश्यप्रवृत्तिनिमित्तत्वान्निमित्तत्वाप्रतीतेः समयोद्ग्रहः सर्वेशादेरेनाउ
स्याप्रतिबंधि ॥ ॥ नीनां प्रकाश्यं दृष्टमानापदार्थगतसादृश्यविज्ञानात्तदुप्रतियोगक

गर

स्मर्यमाणस्य गोगतस्य सादृश्यविशिष्टस्य ज्ञानमुपमानमिति वर्णयंति। यथा गामनुदृष्टवतो वनं
गतस्य नागरिकस्य गवये दृश्यमाने गोसादृश्यं स्मर्यमाणे नगरस्थे गवि गवयप्रतियोगि
कगोसादृश्यज्ञानं एतत्सादृश्यः कौ रिति तदिदमनुमानान्नातिरिच्यते। तथाहि। गौर्गवय
सदृशः गवयस्थसादृश्यप्रतियोगित्वात्। यो यद्गतसादृश्यप्रतियोगी स तत्सदृशः। यथाय
मो मैत्रेतराणोत्र उमानप्रवृत्तेः न च व्याप्तिग्रहणविरहिणामपि सादृश्यप्रतीतिदर्शना
दनुमानत्वमिति वाच्यं। सादृश्यमेवं ततः करतलयोरिव दृष्टहीनव्याप्तिकत्वात्। किंच सादृ २५
श्यदर्शनात् स्मर्यमाणपदार्थगतसादृश्यस्य ज्ञानस्य प्रमाणांतरत्वमुपगमे विसादृ

श्यदर्शनात् प्रतियोगिकस्मर्यमाणवस्तुगतवैसादृश्यज्ञानस्यापि प्रमाणांतरमापद्येयं उ
न्यायवात्॥ ॥यथाहुः॥ ॥साधर्म्यमिव वैधर्म्यं मानमेवं प्रसज्यते। अर्थापत्तिरसौ व्यक्ति
मिति चेत्तत्र ते न किमिति॥ ॥अथागमं लक्षयति॥ ॥यथार्थदर्शिनः उक्तो यथादृष्टार्थवा
दिनः उपदेशः परार्थोयं स इहागम उच्यते। यथावस्थितार्थदर्शी यथादृष्टार्थवादी वा
स्नातस्त्वोद्दे प्रवृत्तिनिवृत्त्युपयोगि वचनमागमः। यथार्थदर्शिनोऽप्ययथार्थवादिनो
वचनं न प्रमाणं। यथा विप्रलंभकस्य यथार्थदर्शिनोऽयथार्थवादिनो वचनं न तथा।
यथा भ्रांतस्य। यथार्थदर्शिनोपि यथार्थदृष्टार्थवादिनोऽप्याप्तो काकदंतादितिवत्

श्रोतृवद्वर्त्तिनिरयतुपयोगित्वेनमनुपादेयमिति।तन्न तस्य श्रुतौ परार्थ इति।तदुक्तं॥
श्रोतायदेशः शब्दइति।उपदिश्यतेनेनेत्युपदेशो वाक्यं।तदर्थज्ञानं चेति।सर्वत्र वाक्यार्थ
ज्ञानं फलं।ज्ञानं तत्र दानादिबुद्धिरिति।एवमेतानि वक्ष्यमाणानि।एतेषां वक्तारः षां
यथा मंत्रवर्णं तत्त्ववित्।अर्थापत्तिर्मन्त्रवयोरनुमानं तत्त्ववादेतिन्न अन्यत्र शब्दानतिरेकाद
नावच्छिन्नप्रत्यक्षाद्यव्यतिरेकात्।तादृतस्तत्र कारैरवनन्तरनुद्भूमितिसिद्धार्थापत्तियं तथा
नावप्रामाण्यादिति परिचोदनात्सर्वकेशब्दैऐतिह्यानर्थान्तरत्वात्।अनुमानं थापि २५
त्तिर्यं तथा नावानर्थान्तरत्वादित्याहुरिति।समर्थितं तं।तथा हि।अनुपपद्यमानधर्म
र्थि

देवदत्तप्रतियोगिकगृहसंसर्गिप्रागभावस्य तियावत् बहिर्भावस्य कल्पनीगृहसावदर्शनेनो
दर्शनात्तदुपपादकत्वेनार्थान्तरकल्पनमर्थापत्तिः॥ ॥यथा॥ जीवतो देवदत्तस्य गृहे दातावद्
दर्शनेनोबहिरित्तावच्छात्र तावद्बहिस्त्वि भंतारणगृहे तावच्छ्यकानुपपत्तिरिति
वाच्यं।तमंतारणाभावेन भवतीति चेत्।न भवतीत्यस्य कोऽर्थः किं न जायते किं वा नावति
ष्ठत इति।न प्रथमः।बहिर्भावाकार्यत्वोद्भृते तावच्छ्यन द्वितीयः।शब्दांतरेण विना नाव
यथोपांगीकारात्।गम्येन हि विना गमकस्यानवस्थानमेवाविनाभावः।कीदृशं च बहिर्भाव
स्योपपादकत्वं।न तावत्तज्जनकत्वं।तदकार्यत्वात्तयोस्तत्केत्वात्।स्वभावरूपत्वं एवं गृहा
भावस्य कल्पनमिति चेत्।तद्व्यापकत्वमवाजिमतं स्यात्।प्रमाणाद्य विरोधस्या

उपपत्तिरिति चेत्। मैवं व्याहतं नापि द्वयोः प्रमाणयोः कृतो विरोध एव न स्यात् तं नवति। स्वकोर्थे
घटो यमिति वस्यदस्यं नवात्। विरुद्धद्वयेऽन्नप्रमाणं एवं वस्तु नो द्वैरूप्यासंभवान् रस्यरिये
स पर्यायमिति वरन्यतरस्याप्रामाण्यावश्यं तावता। न चात्र जीवनगृहासत्त्वयोर्विरोधोऽ
स्ति। जीवत एव स्वात्मनो गृहासत्त्वदर्शने न जीवनगृहासत्त्वयोः संदेहं नवात्। जीवनप्र
माणेन जीवेऽस्मीति जीवनांशनिश्चितस्यापि तावदशस्यामान्यस्तं बाधवागतेन जीव
नेन गृहे वा बहिर्वेति विशेषे संदेहमात्रं जायते। न प्रमाणं किंचिदपि प्रवर्तत इति नास्ति गृ २६
हासत्त्वप्रमाणविरोधः। अत एव जीवनविशिष्टेन गृहासत्त्वलिंगेन बहिर्विषये

मानेन तु करं जीवनविशेषानिश्चयेऽपि सामान्यनिश्चयेन तद्विशिष्टस्य गृहासत्त्वस्य लिंग
त्वात्। यस्माद्व्यापकरूपवद्विशेषानिश्चयेऽपि धूमेऽग्निमात्रनिश्चये तद्विशिष्टदेशादिकमव
धार्यं व्यवहारप्रवृत्तिः। प्रयोगश्च। देवदत्तो बहिरस्ति। विद्यमानत्वे सति गृहेऽसत्त्वात्।
यो विद्यमानो यत्र नास्ति स ततोऽन्यत्रास्ति यथाहमिति॥ ॥ तथा देवदत्तो बहिर्नास्तीत्यत्र
त्र स्वकल्पितगृहेसत्त्वात् घटादृमिति। तस्मात् सिद्धमेवार्थापत्तिरनुपपद्यमानदर्शनादुपपादककल्प
नमनुमानमिति। अन्यथानुमानतया प्रसिद्धं धूमोदाहरणमपि स्मरः कारणं दहनमा
क्षिपति। प्रतिक्षिपति वानुपलब्धिमिति प्रमाणद्वयविरोधात्... तावद्विनागेन

अनुपलब्धिनिर्णयः

इदनुतत्तावनवस्थाएनंतर तागेचइदना वस्थान नित्यत्वापि त्रिशयथा डः॥ अनियम्ये न्ये
नाश्रुतिः॥ नैर्नियंतो यमादकः॥ न मानदो विरोधोऽस्ति प्रसिद्धे बाधयो स्मरति। अन्ताव
च्छन्नप्रत्यक्षादिक्षु यथाप्रं ज्ञवमंतर्जाकाः। तत्र तावद्दिक्कृतलेघनदोनास्तीति प्रतीति
रिंद्रियजन्या॥ अनन्यत्रोपक्षीणेंद्रियव्यापारव्ययव्यतिरेकानुविधायित्वात्। रूपादि
बुद्धिवत्। अधिकरणग्रहणोपक्षीणमिंद्रियमिति चेत्। न। त्वगिंद्रियेण घटादिग्रहणे
प्रतियोगिस्मृतिमतोऽध्यक्षत्वाभावप्रतीति प्रसंगात्। प्रतियोगिग्राहकेंद्रिये २७
णाधिकरणप्रतीतिरपेक्षणीयेति चेत्। न। त्वगिंद्रियग्राह्यवायौ वायुरूपाभाव

अधिकरणग्रहणस्य

नवगमप्रसंगात्। अन्ताव प्रतीतौ वाधिकरणप्रतीतिरुपयोगान्न तत्रेंद्रियमुपक्षीयते। उ
पयोगेऽपि नातु नाशोत्तरकालं घटप्रध्वंसानिरूपणप्रसंगात्। तस्य प्रतिप्राग्भावाधिकरणाभा
वेऽपि तेनैव आश्रयत्वात्। तेषां च विनष्टत्वात्। नच अधिकरणग्रहणावश्यंभावः। तथापि न
तत्रेंद्रियमुपक्षीयते। तदवान्तरव्यापारत्वात्तस्य। नन्वेवं लिंगज्ञानव्यापींद्रियावांतर
व्यापारत्वप्रसंगाद्वह्न्यादिज्ञानमपींद्रियजन्यं स्यात्। तस्मात्तत्र तदवांतरव्यापारत्वात्। इंद्रियस्य स्वकं
लिंगज्ञानमंतरेणापि लिंगिज्ञाने सामर्थ्योपलंभात्। नच तु उक्तवादिंद्रियसन्निकर्षाभावो। नात्वस्य
यथा ज्ञानेन विषयत्वेन सन्निहितत्वात्। तथेंद्रियेणापि सन्निकर्षोपपत्तेः। नच तु उक्तत्वमपि। अन्ताव

प्रतियोगित्वं दि दुष्टत्वेन ज्ञानत्वं किंच प्रमाणत्वादिना तु यत्र लब्धेर्ज्ञानादेव ज्ञानजनकत्वमा
क्षेपं। अन्यथा तस्याप्यज्ञानत्वरूपत्वेनानुपलब्धौ तराप्रकाशमनवस्थाप्रसंगात्। तत्रस्थाज्ञान
करणाद्यद्भूयादि ज्ञानवादिनां ज्ञाने चक्षुरिंद्रियजन्यत्वं। अथ यद्यपि सर्वत्र वा ह्यालोके ज्ञाने प्रमाण
वत्वं। तेनैवमनन्यो ज्ञानहेतुत्वं दृष्टमित्यज्ञानज्ञानेपि तथात्वमवगम्यते इत्यनुपलब्धिर्यदृका
रित्वं नोपपद्यते। किंच ज्ञानजनने च समर्थस्य लिंगशब्दादेस्तदज्ञाने ज्ञाननिरपेक्षसामर्थ्यमु
पलब्धमिति नेन्द्रियस्यापि ज्ञानप्रतियोगिनि घटादौ समर्थस्य तदज्ञानज्ञानजननेपि सामर्थ्य
मनुमीयते। किंच इंद्रियां हि प्राप्यकारित्वेन दृष्टमाणमज्ञानज्ञानं तदेवात्मनः करणीकारयति। को। २८

णादेर्घटादेरिव हि ज्ञाने द्रव्यादेः प्रादुर्भवंति। अन्यथातिप्रसंगात्। किंच अदृष्टं तत्र मितिविशिष्टवि
षयज्ञाने चेंद्रियजन्यत्वाविशेषेणावच्छिन्नोऽशविशेषणाशेऽपि तज्जन्यत्वमनुमानेनापि सिद्धी
करणीयं। तस्मात्तत्र सत्संयोगादनुपलब्धेस्तदज्ञानं प्रत्यक्षं। नन्वेवमनुपलब्धिरपि कारणं स्या
दिति चेन्न। इंद्रियेणानुपलब्धिरपि ज्ञानस्य द्वारकारणमापन्नमाश्रुतं ज्ञानापेक्षं तेषु
ज्ञानानुपलब्धित्वस्य लिंगत्वं नियमनमिति। तदेतत्सर्वं न्यायकुसुमांजलौ प्रपंचितमाचार्यैः। यथा।
प्रतियन्नैराद्विरो कार्येंद्रियस्यानुपलब्धेयात्। अज्ञातकरणं वापि नायं भावशांबेनेवनः॥ ॥ तैं
तथा॥ प्रतियोगिनिसामर्थ्याद्वापाराश्च व्यवधानतः। अनन्वयबाह्याणामिंद्रियाणां वि

कल्पनादिति। ननु दृष्टाद्रिमात्रमनुभूयान्यत्र गतवतः प्रतियोगिस्मरणे सतीन्द्रियव्यापारमे
न्तरेणाभावोऽनुभूयते। यथाहं स्वरूपमात्रं दृष्टवान् पश्चात्। किं चित् स्मरन्नपि। अन्यत्र नास्ति
तां दृष्टस्तथैव प्रतिपद्यत इति। सत्यं। न तत्राभावप्रत्यक्षं। किं तु स्मरणयोग्यस्य स्मरणाभा
वादनुमीयते। स्मरणाभावश्च मानसप्रत्यक्षेणेति नानवस्था। अनयैव दिशा प्रातर्गृहेऽभावादिवि
ज्ञानमपि नेयं। कथमन्यथा प्रमाणं त्वयादिनः। सायं तत्र तस्य मयैवानुभूयमानस्यैव गतत्वात्। प्रातःका
लीनाभावविषयत्वेनाभावा ज्ञायते। न हि तदिदानीं तस्यानुपलब्धिरस्ति। प्रातःकालीनेवानुभव २९
वृत्तरिति चेत्। न। तथापि दृश्यत्वाभावेन योग्यानुपलब्धेरभावात्। स्मर्तव्यस्यास्मरणा

तावत्तत्राभावज्ञानकरणमिति चेत्। तर्ह्यमानोऽपि प्रमाणाभावो नास्तीत्यस्यार्थस्येति ना
प्यनुमतेरप्रलपितमेव स्यात्। तदत्र त्विदं तावत् प्रमेयमपलपन्तः प्रमाणविशेषचिन्तमेव
न स्याद्। तेनेति कामितद्भूतले घटो नास्तीति प्रतीतिर्निर्विषया न स्यात्। नास्तीति व्यवहारमात्रमे
वात्रास्तीनत्वं विदितिचेत्। तर्हि संविदपलापदोषस्तावदापद्येत। व्यवहारालंबनं च न किं
चित्तत्प्रयासः। भूतलमात्रमिति चेत्। न। घटवति भूतले भूतलमात्रत्वाभावान्न घटाभाव
व्यवहारो न स्यात्। तन्मात्रशब्दस्य भूतलादर्थान्तरव्यावृत्तिपरत्वेनाभावस्वीकरणात्।
कस्य घटवत्त्वापिप्रसंगात्। यादृशस्य भूतलस्य विज्ञानमभावग्रहणकारणं तद्वद्धि

रूपगम्यते। तद्दर्शनेनास्माकं व्यवहाराजनकत्वमिति चेत्॥ न॥ आश्रयज्ञानस्य कारणत्वा
नभ्युपगमात्। अत एव ज्ञानस्यादृष्टत्वास्यापगमेनास्माकं न कोऽपि क्षतिः। न हि घटवति प्रसंगः।
ह दृश्यादर्शनस्यैव तस्यैवादृष्टत्वांगीकारात्। तस्य च तत्रापि संभवात्। तव हि तिमला भावाश्रय एवा
स्माकं व्यवहारविषय इति चेत्। तादृशो ह्यावहाराश्रय एव व्यवहारजनकत्वं भावहितिगु
णादिपदार्थादर्शनं अज्ञानिः स्यात्। न च बुद्धिनिष्ठ एवाभावस्तु तुच्छादिन इति नाव नाति
नानामतत्वं तास्मतां गगनकुसुमादीनामभावाभावत्वनाभाव एव न विहितं तु बुद्धिस्थत्वं ३०
वा एवमादिपदार्थास्तित्र तत्त्वं तत्त्व युः न च वयमभावः। किंतु तज्जन्यतीतादिवस्तुतत्वे

वा। नाप्याबद्धहेतुहेतुः। प्रसंगात्। नापि अन्तरा केवलस्याभावस्य याथार्थ्यत्वेनात्माश्रयानवस्थ
योरन्यतरप्रसंगात्। इत्थमुपपद्यमानाश्रयत्वेनाभावमपह्नुवानस्तु त्वन्यायतयास्तु कोऽपि
धर्मज्ञानमप्यपह्नुवीत। स्वातोऽवांतरविशेषविनिर्दिष्टः कथं तस्य प्रमेयतेति चेत्॥ न॥ ज्ञा
नादिवदुपपत्तेः। निःस्वभाव एवायमिति चेत्। नाद्य स्वाहं त्रिरूपस्य विद्यमानत्वात्। तथा ज्ञा
नस्यादिनिष्ठधर्माणां यथा तत्र तु विपरीतं चेत्तत्वमिति। तस्माद्यत्किंचिदेतत्। अतं गोत्वाभावानामु
पदर्शनादेः। घटादिविज्ञानं चोहेतुपविनाभावप्रतियोगिनेन ज्ञायत इत्यनुमानमेव ति
हेतुः। हेतोः। अनिर्दिष्टप्रवर्त्तकं प्रत्याद्यपारंपर्यमिति हि। यथा बाटवाट विश्र वणाश्च

त्वारेत्वरे शिवः पर्वतः पर्वतो रामः सर्वत्र मदस्तदन इति आशितत्प्राया शोऽप्रमाणमेव प्र
माणेऽन्तर्भवति शब्दस्य वर्तन्ते इति। यथा कुः इदं तत् शतादौ मंत्रवाधास्य दस्रा प्रसक्तिर्विप्लु
तिनावा माउमानादन्निसाउगतिर्व्व क्रीनतथ्यो निन्द्यो मेतिह्य दुक्तौ नवति अयदिष्टमत्ये
नागमर्कादिषु तेत दृति। स्पष्टमस्य प्रामितिः सद्धि विधं प्रमाणमिति डिनाः। तैरापे ताप्येव प
रोस्यापरो हलयालक्ष्यितानि तस्मात्रिविधं चत्वार्येव प्रमाणानि इति॥ अथ प्रमेयमामान्यल
क्षणमुरस्ममरो विभागे नोद्दिशति। प्रमेयमपवर्गार्थं ज्ञेयं द्वादशधा चतत्। आत्मा देहेन्द्रि
यार्था धीर्मनो दोषाः प्रवृत्तयः प्रेत्यभावः फलं दुःखं मोक्षस्तत्रात्मा तु चेतनः। सा हा हं दृवाप ३१

वर्गोपयोगि ज्ञानविषयत्वेन मोक्षार्थिभिः प्रकर्षेण मेयं प्रमेयं एतदुक्तं भवति। यादृक् विषयं
मिथ्याज्ञानं संसारमातनोति। यद्विषयं च तत्त्वज्ञानं तन्निवर्त्तयति। तत्प्रमेयमिति। तत्रात्मा
दिमोक्षान्तं द्वादशविधं। तदुक्तं॥ आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफल
दुःखापवर्गास्तु प्रमेयमिति। आत्मानं लक्षयति। आत्मा त्वचेतनः चेतन्यं ज्ञानं तदाश्रय
आत्मा। यदा कदाचिच्चैतन्यसमवायसम्बन्धेन लक्षणं वा नेन्द्रकेच्छितस्तु तैरव्याप्तिः स्वत्र
कारस्तुप्रत्यवदर्शनप्रतिसंधानहेतुकेच्छादिलिंगत्वमात्मनो लक्षणमाद। इच्छाद्वेषप्रय
त्नसुखदुःखज्ञानान्यात्मलिंगमिति। स्वकारशीलमनुविदधानः शरीरस्य लक्षो

लक्षणमाह। शरीरमंत्यावयविचेष्टाश्रयं भोगेंद्रियाश्रयः। अंत्यावयविचेष्टाश्रय इत्येकं ल
क्षणं। तत्र चेष्टा नाम प्रयत्नवदात्मसंयोगासमवायिकारणिका क्रिया विवक्षिता। तत्राद
ष्टवदात्मसंयोगासमवायिकारणकक्रियाश्रयाणां वृक्षनववनादीनां निरासः। तदुक्तं। अ
वच्छेदकत्तलनं वायोरस्तीयेवमवमानमनसोः। घटे कर्मत्वदृष्टकारितानीति। अंत्यावयवी
तिकरचरणादिव्यवच्छेदः। अंत्यावयविभोगाश्रय इति द्वितीयं। भोगाश्रयत्वं भोगायतनत्वे
यद्यात्मत्वायमात्मभोगवाकृवतीति यावत्। अंत्यतिपूर्ववदवयवव्यावृत्तिः। अवय
वीति मनसः। अंत्यावयवी इंद्रियाश्रय इति तृतीयं लक्षणं। अंत्यावयवीत्येंद्रियारंतत्र 32

परमाण्वादेर्निरासः। तदुक्तं। चेष्टा भोगेंद्रियाश्रयः शरीरमिति। नन्वस्मत्शरीरे व्याप्तिग
कादाचित्कत्वेंद्रियाश्रयत्वो रलक्षणत्वात्। तेषामपि तथा ताकाहिति। इंद्रियलक्षणमाह।
शरीरसंयोगे सत्येव साक्षात्प्रमितिसाधनं। इंद्रियतत्त्व साक्षात्त्वं जातिविशेष इति स्थितिः। शरीर
योग इतीद्रियसंनिकर्षोच्यते। एवकारेण कादाचित्कशरीरयोगिन आलोकादयः सा
कारितिन शरीरयोगीनिचेष्टादिनिलिंगानि। प्रमितीत्यप्रमादेतवाद्दोषाः साधनमिति चें
द्रियसंस्काराणां तथा साधनाद्यगादृक्तत्वेन स्वयमसाधनत्वात्। साक्षात्त्वं तु ज्ञानत्वावां
तरजातिविशेषः। उक्तं। अर्थबुद्धिमनसां लक्षणमाह। अर्थाश्चेदिंद्रियग्राह्या बुद्धिर

र्थप्रकाशनं। सुखाद्युपरोक्षसाधनमन इंद्रियं। श्रोत्रेंद्रियग्राह्यएवार्थत्वेन विवक्षितानां ते
शब्दत्वेष्टत्वाद्यादयश्चत्वारः आत्मा स्वधर्माधर्मसंस्कारगुरुत्वव्यतिरिक्ताश्चतुर्विंशतिर्गुणाः
पंचापि कर्माणि। सामान्यं समवायो नावश्यावत्र बुद्धिः इन्द्रियार्थगतस्य प्राकट्यादिपदस्य वदनी
यस्य प्रकाशां तस्मात्तत्कम्पगमादर्थप्रकाशो बुद्धिरित्युक्तं। सुखादिविषयापरोक्षज्ञानसाध
नमिंद्रियं मनः। साधनमिति कर्तुरात्मनो निरासः। इंद्रियमिति मनःसंनिकर्षस्यादिशब्देन बु
द्धिदुःखेच्छाद्वेषप्रयत्नाग्रह्यां तासुखाद्यन्यतमग्रहणसाधनत्वात् मनवन्तक्षणां तत्र कारास्तु २२
त्त्विन्द्रियसनातविशिष्टेत्विंद्रियेषु नानार्थसंबंधेऽपि युगपत्संयोगक्रमवशात् ज्ञानानामुत्पत्तिक्रमः

क्रमेणैव मन इति। युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगमिति। एवं चाणुत्वे च मनःसिद्धिः अन्य
था युगपदनेकेंद्रियाधिष्ठाने तु युगपद्ज्ञानोदयप्रसंगात्। तथा च विरुद्धे तवगं सर्वस्पर्शद
स्पर्शरहितद्रव्यत्वादित्यादयो धर्मिग्राहकप्रमाणबाधिता एवेति। प्रवृत्तिलक्षणमाह। प्रवृत्तिरत्र
वागादेः पुण्यापुण्यमयी क्रिया। वाङ्मनःशरीराणां चेष्टारूपो व्यापारः प्रवृत्तिरित्युक्तौ प्रवृत्ति
र्वाग्बुद्धिशरीरारंभ इति। अत्र बुद्धिशब्देन बुध्यतेऽनेनेति मनो विवक्षितमिति। दोषलक्षण
माह। प्रवर्तनालक्षणा दोषाः रागादयश्चेते। प्रवर्त्तयंति प्रवर्तना। प्रवृत्तिहेतुत्वादोषास्त
र्ते तेन रागद्वेषमोहाः। अत्र रागद्वेषाववक्ष्यमाणलक्षणौ। मिथ्याप्रत्ययो मोहः। मोहस्य प्र

ह्रतिदेवं न स्यापिवैरागादिं तु रागद्वेषाभ्यामादिकत्वेनात्र दोषेष्वादि रागद्वेषयोः प्रवर्तयन्त इति। तदुक्तं॥
प्रवर्तनालक्षणा दोषा इति। प्रेत्यभावं लक्षयति पुनरुत्पत्तिः प्रेत्यभावः उत्पत्तिरीदृग्देहगतिः। नित्य
स्यात्मनो जननमरणलक्षणत्वात्। ध्यावानिरादद्ववित्तिप्रसक्तेः पोरमणौत्पत्ती इति तदुक्तं।
पुनरुत्पत्तिः प्रेत्यभाव इति फलं लक्षयति। फलं प्रवृत्तिसाध्यं स्यात्। तत्राह्लादकसुखादिकं। प्रवृ
त्तिः पुनः सुखेकरूपेत्युक्तं। तदुक्तं। प्रवृत्तिदोषजनितोऽर्थः फलमिति। दुःखं लक्षयति। प्रतिकूलतया
वेद्यं दुःखं शरीरद्वेषिकप्रियादिकं। प्रतिकूलवेदनीयं दुःखं तच्च शरीरं षडिन्द्रियाणि षड्विषयाः ष २४
ड्बुद्धयः सुखं दुःखं चेत्येकविंशतिविधं। तत्र दुःखं स्वत एव निरूपाधिकं दुःखं। इतराणि

तु सुखसंस्पर्शेऽपि दुःखानुषंगाद्विषसंपृक्तान्नवदौपाधिकदुःखानीत्यर्थः। तदुक्तं बाधनाल
क्षणं दुःखमिति। एतस्यैकविंशतिप्रकारस्य दुःखस्यात्यन्तिकी निवृत्तिरपवर्ग इत्याह। दुःखात्यन्तसमु
च्छेदमपवर्गं प्रलक्षयति। तदुक्तं। तदत्यन्तविमोक्षोऽपवर्ग इति। दुःखनिवृत्तेरात्यन्तिकत्वं नाम नि
वृत्तजातीयस्य तत्रैवात्मनि पुनरनुत्पाद इति। ननु निःश्रेयसोपयोगी निरूप्यादौ निप्रमेयाणां
तराणि चेतनानि कुतः सूत्रकारेण न जल्पितानीत्यत आह। मोक्षस्याङ्गत्वादेतदुपादेन लक्षितानि।
तेषां तत्त्वज्ञानं कारणं षट्कं द्रव्यादिकं न स्यात्। तत्त्वं द्रव्यादीनामपि निःश्रेयसोपयोगीनि विद्यन्ते तत्त्वो
तानि चादृष्टमनिःश्रेयससाधनानि गवादिरूपादीनि लक्षयाम्युक्तं वक्ष्यमाणानामपि परंपरया तदु

पयोगोऽस्तिइतिकारणादेवंत्रमनुपलक्षणमावश्यमेदेति॥ नानिरानीयपदार्थोविशेषातिद्रव्यंगु
णस्तथाकर्मजातिश्चेतत्रयाश्रया॥ विशेषाःसमवायश्चपदार्थाःषडिमेमताः॥ द्रव्यगुणकर्मणाम
वजातिमत्वेनसामान्यादीनांत्रयाणामित्युक्तंएतत्त्रयाश्रयेति॥ तेषामपिजातिमत्वेजात्यनवस्थि
बा॰ ति॥ विशेषस्यस्वरूपव्यावृत्तिः॥ समवायस्यसंयोगस्यसमवायोरन्यतराभावनायंदंधर्मप्राहुःप्रा
तु॥ यथाहुः॥ व्यक्तेरभेदस्तुल्यत्वंसंकरोऽथानवस्थितिः॥ रूपहानिरसंबंधोजातिबाधकसंग्रहइ
ति॥ द्रव्यलक्षणमाह॥ गुणानामाश्रयोद्रव्यंकारणंसमवायिवा॥ गुणानामाश्रयोद्रव्यमित्येकं
लक्षणं॥ समवायिकारणमित्यपरं॥ तदुक्तं॥ क्रियावद्गुणवत्समवायिकारणंद्रव्यमिति॥ द्र ३५
संयोगेनपरिहारेणानित्यव्यक्तिर्विशेषाणांसामान्यंचैकत्वभेदेजातिसंकरश्चतेर

व्याणिपरिसंख्येवक्षेरौपवनोज्योतिरनिलोनभःकालस्तथादिशा॥ आत्मामनइतिप्राहुर्नवद्रव्या
णितद्विदः॥ तद्विदइत्यनेनपदार्थविशेषैमेषसिद्धांतः॥ अन्येतुतमःशब्दयोरपिद्रव्यत्वमिच्छं
तीतिव्यवस्थितं॥ यथाहुः॥ वस्त्रात्मकास्त्वेशरीरानित्याःसर्वगतास्तथा॥ पृथक्द्रव्यतयाते
ष्विनगुणाःकश्यचिन्मताः॥ तथा॥ तमःखलुचलंनीलंपरापरविभागवत्॥ प्रसिद्धद्रव्यवै
धर्म्यान्नवभ्योभेत्तुमर्हति॥ केचित्तुवियमितिविनतानांस्कंदमाणांप्रथिव्यवयवानांतत्त्वोगुण
समइतिवदंति॥ मनोव्यतिरिक्तत्वेसतिस्पर्शवत्वेनक्रियावत्वेरूपवत्वादित्येद्रव्यत्वा
द्युपपत्तेः॥ नित्यानांतरवत्वेऽस्माकोपलंनद्व्यसंगेनपृथिवीगुणत्वानुपपत्तेआलोकाभावस्त

मइति कारणताशरीरेऽन्यथासिद्ध्युपरागत्वेनतन्त्रत्वस्यामात्तस्मान्नवैव द्रव्याणीति सिद्धं। तदुक्तं। पृथि-
व्यापस्तेजोवायुराकाशः कालो दिगात्मा मन इति द्रव्याणीति। तत्र गंधवती भूमिः। आपः सांसि-
द्धिकद्रवाः। उष्णस्पर्शगुणं तेजो। नीरूपस्पर्शवान् मरुत्। भूमित्वे दाब्वे वैजात्यं पाणिषावद्रूपापा-
णादयः। सांसिद्धिकत्वं द्रवत्वव्याप्यजातिसिद्धत्वं। तेन द्रव्यांतरसंश्लेषोपाधिकद्रवत्वानां पार्थिवा-
नां सर्पिःप्रभृतीनां। तद्रूपाणां रससीसादीनां च व्यवच्छेदः। तथोक्तं। सर्पिर्जतुमधूच्छिष्टानां पा-
र्थिवानामग्निसंयोगात् द्रवत्वमद्भिः सामान्यमिति। तैजसानां त्रपुसीसलोहरजतसुवर्णादी-
नामग्निसंयोगात् द्रवत्वमद्भिः सामान्यमिति। अयं विकारः। उष्णस्पर्शेति शीतस्पर्शनामनु ३६
करकादि

हूताशपतत्करकीनां जलीयत्वं पवनादीनां निरासः। नन्वेवं चांद्रमस्तेजोमध्यस्थव्याप्तिः उष्णस्पर्शोस्या-
दित्यत आह उष्णस्पर्शवत्वेनदीमानीगत शैत्यमात्रोपलंभात्। चतुर्विधं तेजो भौमं दिव्यमुदर्यमाकरजं
चेति। निरूपस्पर्शवत्वात् पृथिव्यादीनामाकाशादीनां च व्यवच्छेदः। अप्रत्यक्षस्यापि वायोः स्प-
र्शशब्दधृतिकंपलिंगैः सिद्धिः। तत्रामानावयवस्पर्शो ऽन्यगमनानुमापनसंमूर्छनलिंगेनानुमिति-
रिति। नन्वेवं शब्दगुणकमाकाशादिकं च वदतानंतरदिशा कालादिति हेतुः। शब्दं प्रागेव लक्षितं। श-
ब्दगुणकत्वेन तत्सिद्धिः। तच्चानुमेयं। तदुक्तं। निष्क्रमणं प्रवेशनमित्याकाशलिंगमिति। चिर-
क्षिप्रयुगपदित्यादिप्रत्ययव्यवहारासाधारणनिमित्तं कालः। तदुक्तं परापरव्यतिकरानुमेयः

कालइति लक्षणं।अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति कालिलिंगानि।तत्रापरस्मिन्नपर
मिति द्विविमितत्वप्रतिपत्त्यर्थमुक्तं।एकस्मिन्देके एकस्याभावात् तावच्छेदकः काल इति के
चित्।एकस्यापि कालस्योपाधिभेदात् क्षणलवादिव्यपदेशः।पूर्वापरादि दिक्प्रतीतिव्यवहार
योनिमित्तं दिक्।तदुक्तं।इत इदमिति यतस्तद्दिशो लिंगमिति।इत इदं पूर्वेण इत इदमपरेणेत्या
दिज्ञानं यतस्तद्दिशो लिंगमित्यत्रार्थः।सा च कालवदेकापि विभुर्नित्या चैव तत्तदुपाधिभेदात् प्राच्या
दिव्यवहारहेतुर्भवतीति दर्शयितुं दिगित्येकवचनं।कार्यविशेषणानानात्वमिति।आदि २७
त्यसंयोगः कार्यविशेषास्य विवक्षितः।शेषमात्मा मनश्च प्रागेव प्रमेयवर्गे व्याख्यातमिति।अथगु

णलक्षणं।कर्मणो व्यतिरिक्ते वै जातिमानाश्रयो गुणः।जात्याश्रय इति सामान्यादीनां त्रयाणां नि
रासः।मात्रेति गुणादेरपाश्रयो द्रव्यं व्यवच्छिद्यते।कर्मापि जातिमानाश्रय इति तद्वारणाय कर्म
णो व्यतिरिक्तो इतीत्युक्तं।तदुक्तं।जात्याश्रयो गुणः संयोगविभागयोरनपेक्षं कारणं।इति गु
णलक्षणमिति।ननु गुणोपि गुणवत्तत्समवायस्य सत्त्वात् घटावच्छाश्रय इति कथं जातिमा
नाश्रय इत्युक्तं।अनवस्थाहेतुस्तया समवायस्य समवायांतराभावादिद्रव्यत्वेन संयोगाना
वात्।संयोगसमवाययोर्न विधर्मत्वेनानावाश्रयत्वासंभवात्।केवलं विशेषणविशेष्यतावदेव
